# ShrI Anantakrishnavaradaraja Ashtakam

# શ્રી અનન્તકૃષ્ણવરદરાજાષ્ટકમ્

## Document Information

Text title : Anantakrishnavaradaraja Ashtakam

File name : anantakRRiShNavaradarAjAShTakam.itx

Category : vishhnu, aShTaka, krishna

Location : doc_vishhnu

Author : Brahmashri Rangasvami Dikshitah (on January 2, 2023)

Acknowledge-Permission: Author c/o Dr Ganga Ramachandran, Geetanjaliglobalgurukulam

Latest update : February 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 8, 2023

*sanskritdocuments.org*

# શ્રી અનન્તકૃષ્ણવરદરાજાષ્ટકમ્

શ્રી-ભૂમિ-નીલા-પરિસેવ્યમાન-
મનન્તકૃષ્ણં વરદાખ્ય-વિષ્ણુમ્ ।
અઘૌઘવિધ્વંસકરં જનાનાં
અઘંહરેશં પ્રભજે સદાઽહમ્ ॥ ૧॥

તિષ્ઠન્ સ્વધિષ્ણ્યે પરિતો વિપશ્યન્
આનન્દયન્ સ્વાનભિરામમૂર્ત્યા ।
યોઽઘંહરગ્રામજનાન્ પુનીતે
હ્યનન્તકૃષ્ણં વરદેશમીડે ॥ ૨॥

ભક્તાન્ જનાન્ પાલનદક્ષમેકં
વિભું શ્રિયાઽઽશ્લિષ્યતનું મહાન્તમ્ ।
સુપર્ણપક્ષોપરિરોચમાન-
મનન્તકૃષ્ણં વરદેશમીડે ॥ ૩॥

સૂર્યસ્ય કાન્ત્યા સદૃશૈર્વિરાજદ્-
રત્નૈઃ સમાલઙ્કૃતવેષભૂષમ્ ।
તમો વિનાશાય મુહુર્મુહુસ્ત્વા-
મનન્તકૃષ્ણં વરદેશમીડે ॥ ૪॥

અનન્તસંસાર-સમુદ્રતાર-
નૌકાયિતં શ્રીપતિમાનનાબ્જમ્ ।
અનન્તભક્તૈઃ પરિદૃશ્યમાન-
મનન્તકૃષ્ણં વરદેશમીડે ॥ ૫॥

નમન્તિ દેવાઃ સતતં યમેવ
કિરીટિનં ગદિનં ચક્રિણં તમ્ ।
વૈખાનસૈઃ સૂરિભિરર્ચ્યયન્ત-
મનન્તકૃષ્ણં વરદેશમીડે ॥ ૬॥

તનોતિ દેવઃ કૃપયા વરાન્ યો
    ચિરાયુષં ભૂતિમનન્યસિદ્ધિમ્ ।
તં દેવદેવં વરદાનદક્ષ-
    મનન્તકૃષ્ણં વરદેશમીડે ॥ ૭॥

કૃષ્ણં નમસ્કૃત્ય મહામુનીન્દ્રાઃ
    સ્વાનન્દતુષ્ટા વિગતાન્યવાચઃ ।
તં સ્વાનુભૂત્યૈ ભવ-પાશ્ન-વન્ધ-
    મનન્તકૃષ્ણં વરદેશમીડે ॥ ૮॥

અનન્તકૃષ્ણસ્ય કૃપાવલોકા-
    દઘંહર-ગ્રામજ-દીક્ષિતેન ।
સુસૂક્તિમાલાં રચિતાં મનોજ્ઞાં
    ગૃહ્ણાતુ દેવો વરદેશ- વિષ્ણુઃ ॥

॥ ઇતિ અઘંહર-ગ્રામ-વાસિના અનન્તકૃષ્ણવરદરાજસ્ય
પાર્શ્વવર્તિના બ્રહ્મશ્રી રઙ્ગસ્વામિ-દીક્ષિતેન વિરચિતં
અનન્ત-કૃષ્ણ-વરદરાજાષ્ટકં સમ્પૂર્ણમ્ ॥

Composed by Brahmashri Rangasvami Dikshitah
(on January 2, 2023)

---

*ShrI Anantakrishnavaradaraja Ashtakam*
pdf was typeset on February 8, 2023

Please send corrections to *sanskrit@cheerful.com*